GLEANINGS FROM THE MATSYA PURĀṆA

ON

WAR AND PEACE.

K. A. NILAKANTA SASTRI, M.A.,
Madras.

Happening to read the *Matsya Purāṇa* in the interval between the Munich agreement and the outbreak of the present war, I was struck by some striking analogies in thought and policy between the Purāṇic tales and the history of our own times and I think it may be of some interest to draw attention to them here.

The passages of the *Purāṇa* which I have in mind relate to incidents in the wars between the Devas and Asuras, not occurrences of human history. We generally think of the Devas as on the side of the Good, and of the Asuras as embodiments of Evil; but this simple view is apt to be disturbed seriously by some of the extracts that follow, which show the Asuras in a position of relative moral superiority to the Devas. This may be due to Devas being thought of as not too particular about the means they adopt for achieving admittedly noble ends, or it may be the relic of a past when the roles of the Devas and Asuras were the reverse of what we now take them to be; the Asuras are known as *pūrvadevas* (Devas of yore.)

NON-VIOLENCE

My first extract relates to the adoption of Non-violence as a policy by the Asuras. Śukra, their preceptor was the inventor of this policy, and he was much more fortunate than the modern prophets of non-violence, for his followers accepted the policy wholeheartedly and pursued it to the letter. Once

the Devas attacked the Asuras in great force; their aim was to kill as many as possible, and drive the rest into the nether world, *pātāla*. The Asuras, unable to resist the onslaught, sought the help and guidance of their *guru*. After some time, noticing the decimation in the ranks of the Asuras, their Brahmin *guru* bethought himself of all the misfortunes of the Asuras in their earlier wars with the Devas, and said: "By his three strides Vāmana deprived you of the three worlds; Bali was bound, and Jambha and Virocana killed. Many great Asuras have been destroyed by the Devas in the course of a dozen wars; by various stratagems they have contrived to inflict the heaviest losses on you; and there are only a few of you left still; I rather think this war should stop. Times are against you, and you will do well to follow the policy I lay before you. I shall go to Mahādeva and secure from him the *mantras* that will ensure our eventual victory against our enemies; but you shall not fight till then." Then the Asuras having come to an agreement among themselves told the Devas: "We have laid down arms, and we have no armour and no chariots; we intend to put on robes of bark and enter the forests for penance." Hearing these words of Prahlāda, the Devas rejoiced and went back. Śukra then asked his followers to go and live in his father's hermitage for some time awaiting his return after his mission to Mahādeva.

The further stages of the story need not be followed here, but it must be stated that when the Devas subsequently discovered the real motive behind the 'peace-offensive' of the Asuras, they made no bones about attacking them even though they still kept up the farce of disarmament, and sought the protection of a woman, Śukra's mother, against the renewed attacks of the Devas.

War Against Civil Population

Indiscriminate attacks directed against the civil populations of belligerent countries have become the most dreaded feature of modern warfare. Spain and China are witnesses to

the horrors of this gruesome practice, and it is hardly a few days since Hitler passed the word for indiscriminate bombing of open cities in Poland. There is at least one conspicuous example of such totalitarian war in the stories of the *Purāṇa*. Rudra's war against the Tripura, the triple metal forts of the Asuras, was such a war; and in two very eloquent and moving passages (they form our extracts II and III) the poet has described the sufferings of women and children, husbands, brothers and sisters as their near and dear ones were being burned to death before their eyes. The ruin of fine buildings, beautiful gardens and great works of art is also pictured vividly. This wholesale destruction is undertaken by Agni, the god of fire, who goes round carrying out his cruel orders and to whom the women who are his victims address many touching appeals, which make the situtation ever more poignant. Agni's answer might well be that of many an airman to-day, that he did not like the job, but he was no free agent and only carrying out the behests of his superiors.

Appeasement

Critics of British foreign policy in recent years have often pointed out that it was a mistake to have allowed Germany to rearm while other nations were following a half-hearted policy of partial disarmament, in the vague hope that somehow war might be avoided. The result was seen about a year ago when the British premier found himself forced to follow 'appeasement' in Munich in the face of a determined enemy with consequences that are not any more in doubt.

In a similar situation, the policy to be followed by the Devas was laid down categorically and with clear logic by their wise counsellor Bṛhaspati. The great Asura, Tāraka, after consolidating his power over the rest of the Universe, was advancing on an aggressive campaign against the abode of the gods, whose happiness excited in him feelings more or less similar to those that the prosperity of the Jews produces in Hitler and his friends. Vāyu, descrying the approach of

Tāraka's forces from a distance, went and reported it in Indra's assembly. Indra applied to Bṛhaspati for advice on the policy to be followed by the gods. Bṛhaspati's answer (our extract IV) perhaps contains nothing extraordinary, and might have been passed over, ordinarily, as a string of commonplaces; but now it seems replete with a wisdom that the world has missed in the last few years. He said: 'Ancient tradition favours peaceful negotiation as the first instrument of policy for one who desires ultimate success. But everything depends on the place, time, and the nature of the enemy. A cruel and covetous enemy, intoxicated with self-confidence, will not be amenable to friendly negotiation. The Asuras have enormous faith in themselves, and there is no peace in their heart; and you cannot create dissensions among them by presents or otherwise, for they have all they want. To fight them is your only course. A policy of peace adopted towards the wicked leads to disaster. The pacific aims of noble men are mistaken by the wicked to be the result of fear; a manly course is the only thing that would impress such a foe, who never responds to a policy of peace. Even the good have to put aside their goodness for a time on such occasions.' Indra accepted the advice and prepared for war.

EXTRACT I

ततो देवास्तु तान् दृष्ट्वा वृतान् काव्येन धीमता ।
संमन्त्रयन्ति देवा वै संविज्ञास्तु जिघृक्षया ॥ ६६.

काव्यो ह्येष इदं सर्वं व्यावर्तयति नो बलात् ।
साधु गच्छामहे तूर्णं यावन्नाध्यापयिष्यति ॥ ६७.

प्रसह्य हत्वा शिष्टांस्तु पातालं प्रापयामहे ।
ततो देवास्तु संरब्धा दानवानुपसृत्य ह ॥ ६८.

ततस्ते वध्यमानास्तु काव्यमेवाभिदुद्रुवुः ।
ततः काव्यस्तु तान् दृष्ट्वा तूर्णं देवैरभिद्रुतान् ॥ ६९.

रक्षां काव्येन संहृत्य देवास्तेऽप्यसुरार्दिताः ।
काव्यं दृष्ट्वा स्थितं देवा निःशङ्कमसुरान् जहुः ॥ ७०.

ततः काव्योऽनुचिन्त्याथ ब्राह्मणो वचनं हितम् ।
तानुवाच ततः काव्यः पूर्वं वृत्तमनुस्मरन् ॥ ७१.

त्रैलोक्यं वो हृतं सर्वं वामनेन त्रिभिः क्रमैः ।
बलिर्बद्धो हतो जम्भो निहतश्च विरोचनः ॥ ७२.

महासुरा द्वादशसु संग्रामेषु सुरैर्हताः ।
तैस्तैरुपायैर्भूयिष्ठं निहता वः प्रधानतः ॥ ७३.

किञ्चिच्छिष्टास्तु यूयं वै युद्धं मास्त्विति मे मतम् ।
नीतिं यां वोऽभिधास्यामि तिष्ठध्वं कालपर्ययात् ॥ ७४.

यास्याम्यहं महादेवं मन्त्रार्थं विजयावहम् ।
अप्रतीपांस्ततो मन्त्रान् देवात् प्राप्य महेश्वरात् ॥
युध्यामहे पुनर्देवांस्ततः प्राप्स्यथ वै जयम् ॥ ७५.

ततस्ते कृतसंवादा देवानूचुस्तदासुराः ।
न्यस्तशस्त्रा वयं सर्वे निःसन्नाहा रथैर्विना ॥ ७६.

वयं तपश्चरिष्यामः संवृता वल्कलैर्वने ।
प्रह्लादस्य वचः श्रुत्वा सत्याभिव्याहृतं तु तत् ॥ ७७.

ततो देवा न्यवर्तन्त विज्वरा मुदिताश्च ते ।
न्यस्तशस्त्रेषु दैत्येषु विनिवृत्तास्तदा सुराः ॥ ७८.

ततस्तानब्रवीत् काव्यः कञ्चित् कालमुपास्यथ ।
निरुत्सिक्तास्तपोयुक्ताः कालं कार्यार्थसाधकम् ॥ ७९.

पितुर्ममाश्रमस्था वै मां प्रतीक्षथ दानवाः ।
तत् संदिश्यासुरान् काव्यो महादेवं प्रपद्यत ॥ ८०.

Ch. 47 vv. 66–80

EXTRACT II

काचित् प्रियं परित्यज्य अशक्ता गन्तुमन्यतः ।
पुरः प्रियस्य पञ्चत्वं गताग्निवदने क्षयम् ॥ ६०.

उवाच शतपत्राक्षी सास्राक्षीव कृताञ्जलिः ।
हव्यवाहन ! भार्याहं परस्य परतापन ! ॥
धर्मसाक्षी त्रिलोकस्य न मां स्प्रष्टुमिहार्हसि ॥ ६१.

शायितं च मया देव ! शिवया च शिवप्रभ ! ।
परेण प्रैहि मुक्त्वेदं गृहं च दयितं हि मे ॥ ६२.

एका पुत्रमुपादाय बालकं दानवाङ्गना ।
हुताशनसमीपस्था इत्युवाच हुताशनम् ॥ ६३.

बालोऽयं दुःखलब्धश्च मया पावक ! पुत्रकः ।
नार्हस्येनमुपादातुं दयितं षण्मुखप्रिय ! ॥ ६४.

काश्चित् प्रियान् परित्ज्य पीडिता दानवाङ्गनाः ।
न्यपतन्नर्णवजले शिञ्जमानविभूषणाः ॥ ६५.

तात ! पुत्रेति मातेति मातुलेति च विह्वलम् ।
चक्रन्दुस्त्रिपुरे नार्यः पावकज्वालवेपिताः ॥ ६६.

यथा दहति शैलाग्निः साम्बुजं जलजाकरम् ।
तथा स्त्रीवक्त्रपद्मानि चादहत् त्रिपुरेऽनलः ॥ ६७.

तुषारराशिः कमलाकराणां
यथा दहत्यम्बुजकानि शीते ।
तथैव सोऽग्निस्त्रिपुराङ्गनानां
ददाह वक्त्रेक्षणपङ्कजानि ॥ ६८.

शराग्निपातात् समभिद्रुतानां
तत्राङ्गनानामतिकोमलानाम् ।
बभूव काञ्चीगुणनूपुराणाम्
आक्रन्दितानां च रवोऽतिमिश्रः ॥ ६९.

दग्धार्धचन्द्राणि सवेदिकानि
विशीर्णहर्म्याणि सतोरणानि ।
दग्धानि दग्धानि गृहाणि तत्र
पतन्ति रक्षार्थमिवार्णवौघे ॥ ७०.

Ch. 140. vv 60–70.

EXTRACT III

अम्लानपङ्कजच्छन्ना विस्तीर्णा योजनायताः ।
गिरिकूटनिभास्तत्र प्रासादा रत्नभूषिताः ॥ २९.

पतन्त्यनलनिर्दग्धा निस्तोया जलदा इव ।
वरस्त्रीबालवृद्धेषु गोषु पक्षिषु वाजिषु ॥ ३०.

निर्दयो व्यदहद्वह्निर्हरक्रोधेन प्रेरितः ।
सहस्रशः प्रबुद्धाश्च सुप्ताश्च बहवो जनाः ॥ ३१.

पुत्रमालिङ्ग्य ते गाढं दह्यन्ते त्रिपुराग्निना ।
निदाघोऽभून्महावह्नेरन्तकाले यथा तथा ॥ ३२.

केचिद् गुप्ताः प्रदग्धास्तु भार्योत्सङ्गगतास्तथा ।
पित्रा मात्रा च सुश्लिष्टा दग्धास्ते त्रिपुराग्निना ॥
अथ तस्मिन् पुरे दीप्ते स्त्रियश्चाप्सरसोपमाः ॥ ३३.

अग्निज्वालाहतास्तत्र ह्यपतन् धरणीतले ।
काचिच्छ्यामा विशालाक्षी मुक्तावलिविभूषिता ॥ ३४.

धूमेनाकुलिता सा तु पतिता धरणीतले ।
काचित् कनकवर्णाभा इन्द्रनीलविभूषिता ॥ ३५.

भर्तारं पतितं दृष्ट्वा पतिता तस्य चोपरि ।
काचिदादित्यसंकाशा प्रसुप्ता च गृहे स्थिता ॥ ३६.

अग्निज्वालाहता सा तु पतिता गतचेतना ।
उत्थितो दानवस्तत्र खड्गहस्तो महाबलः ॥ ३७.

वैश्वानरहतः सोऽपि पतितो धरणीतले ।
मेघवर्णापरा नारी हारकेयूरभूषिता ॥ ३८.

श्वेतवस्त्रपरीधाना बालं स्तन्यं न्यधापयत् ।
दह्यन्तं बालकं दृष्ट्वा रुदती मेघशब्दवत् ॥ ३९.

एवं स तु दहन्नग्निर्हरक्रोधेन प्रेरितः ।
काचिच्चन्द्रप्रभा सौम्या वज्रवैडूर्यभूषिता ॥ ४०.

सुतमालिङ्ग्य वेपन्ती दग्धा पतति भूतले ।
काचित् कुन्देन्दुवर्णाभा क्रीडन्ती स्वगृहे स्थिता ॥ ४१.

गृहे प्रज्वलिते सा तु प्रतिबुद्धा शिखार्दिता ।
पश्यन्ती ज्वलितं सर्वं हा सुतो मे कथं गतः ॥ ४२.

सुतं सन्दग्धमालिङ्ग्य पतिता धरणीतले ।
आदित्योदयवर्णाभा लक्ष्मीवदनशोभना ॥ ४३.

त्वरिता दह्यमाना सा पतिता धरणीतले ।
काचित् सुवर्णवर्णाभा नीलरत्नैर्विभूषिता ॥ ४४.

धूमेनाकुलिता सा तु प्रसुप्ता धरणीतले ।
अन्या गृहीतहस्ता तु सखि ! दह्यति बालिका ॥ ४५.

अनेकादिश्यरत्नाढ्या दृष्ट्वा दहनमोहिता ।
शिरसि ह्यञ्जलिं कृत्वा विज्ञापयति पावकम् ॥ ४६.

भगवन् यदि वैरं ते पुरुषेष्वपकारिषु ।
स्त्रियः किमपराध्यन्ति गृहपञ्जरकोकिलाः ॥ ४७.

पाप ! निर्दय ! निर्लज्ज ! कस्ते कोपः स्त्रियः प्रति ।
न दाक्षिण्यं न ते लज्जा न सत्यं शौर्यवर्जित ! ॥ ४८.

अनेन ह्युपसर्गेण तूपालम्भं शिखिन्यदात् ।
किं त्वया न श्रुतं लोके ह्यवध्याः शत्रुयोषितः ॥ ४९.

किन्तु तुभ्यं गुणा ह्येते दहनोत्सादनं प्रति ।
न कारुण्यं भयं वापि दाक्षिण्यं न स्त्रियः प्रति ॥ ५०.

दयां कुर्वन्ति म्लेच्छापि दहन्तीं वीक्ष्य योषितम् ।
म्लेच्छानामपि कष्टोऽसि दुर्निवारो ह्यचेतनः ॥ ५१.

एते चैव गुणास्तुभ्यं दहनोत्सादनं प्रति ।
आसामपि दुराचार ! स्त्रीणां किन्ते निपातने ॥ ५२.

दुष्ट ! निर्घृण ! निर्लज्ज ! हुताशिन् ! मन्दभाग्यक ! ।
निराशस्त्वं दुरावास ! बलाद्दहसि निर्दय ! ॥ ५३.

एवं विलपमानास्ता जल्पन्त्यश्च बह्न्यपि ।
अन्याः क्रोशन्ति संक्रुद्धा बालशोकेन मोहिताः ॥ ५४.

दहते निर्दयो वह्निः संक्रुद्धः पूर्वशत्रुवत् ।
पुष्करिण्यां जलं दग्धं कूपेष्वपि तथैव च ॥ ५५.

अस्मान्संदह्य म्लेच्छ ! त्वं कां गतिं प्रापयिष्यसि ।
एवं प्रलपितं तासां श्रुत्वा देवो विभावसुः ॥ ५६.

मूर्तिमान् सहसोत्थाय वह्निर्वचनमब्रवीत् ।
स्ववशो नैव युष्माकं विनाशं तु करोम्यहम् ।
अहमादेशकर्ता वै नाहं कर्तास्म्यनुग्रहम् ॥ ५७.

Ch. 188 vv. 29–57.

EXTRACT IV

इन्द्र उवाच—

संप्राप्तोऽतिविमर्दोऽयं देवानां दानवैः सह ।
कार्यं किमत्र तद् ब्रूहि नीत्युपायसमन्वितम् ॥ ६३.

एतच्छ्रुत्वा तु वचनं महेन्द्रस्य गिरां पतिः ।
इत्युवाच महाभागो बृहस्पतिरुदारधीः ॥ ६४.

सामपूर्वा स्मृता नीतिश्चतुरङ्गा पताकिनी ।
जिगीषतां सुरश्रेष्ठ ! स्थितिरेषा सनातनी ॥ ६५.

साम भेदस्तथा दानं दण्डश्चाङ्गचतुष्टयम् ।
नीतौ क्रमाद्देशकालरिपुयोग्यक्रमादिदम् ॥ ६६.

न शान्तिगोचरो लुब्धः क्रूरो लब्धसमाश्रयः ।
संतापितः खलो याति साध्यतां भ्रष्टसंशयः ॥ ६७.

साम दैत्येषु नैवास्ति यतस्ते लब्धसंश्रयाः ।
जातिधर्मेण वाऽभेद्या दानं प्राप्तश्रिये च किम् ॥ ६८.

एकोऽभ्युपायो दण्ड्योऽत्र भवतां यदि रोचते ।
दुर्जनेषु कृतं साम महद्याति च वन्ध्यताम् ॥ ६९.

भयादिति व्यवस्यन्ति क्रूराः साम महात्मनाम् ।
ऋजुतामार्यबुद्धित्वं दयानीतिव्यतिक्रमम् ॥ ७०.

मन्यन्ते दुर्जना नित्यं साम चापि भयोदयात् ।
तस्माद्दुर्जनमाक्रान्तुं श्रेयान् पौरुषसंश्रयः ॥ ७१.

आक्रान्ते तु क्रिया युक्ता सतामेतन्महाव्रतम् ।
दुर्जनः सुजनत्वाय कल्पते न कदाचन ॥ ७२.

सुजनोऽपि स्वभावस्य त्यागं वाञ्छेत् कदाचन ।
एवं मे बुध्यते बुद्धिर्यूयमत्र व्यवस्यत ॥ ७३.

Ch. 148. vv. 63–73.